# Shri Ganesha Stuti Shaktikrita

# શક્તિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Shaktikrita

File name : gaNeshastutiHshaktikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 13 | 5.13. 45-62||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# શક્તિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તિરુવાચ ।

વિઘ્નેશાય નમસ્તુભ્યં ભક્તવિઘ્નવિનાશિને ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૪૫॥
ગણેશાય ગણાનાં વૈ પાલકાય પરાત્મને ।
ગુણરૂપાય સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૪૬॥
અમેયશક્તયે ચૈવામેયમાયાપ્રચાલક ।
માયાહીનસ્વરૂપાય માયિભ્યો મોહદાયિને ॥ ૪૭॥
બ્રહ્મભ્યો બ્રહ્મદાત્રે તે બ્રહ્મણસ્પતયે નમઃ ।
બ્રહ્મણે બ્રહ્મરૂપાય હેરમ્બાય નમો નમઃ ॥ ૪૮॥
કર્મણાં ફલદાત્રે તે કર્મણાં કર્મધારક ।
કર્મયોગસ્વરૂપાય પરેશાય નમો નમઃ ॥ ૪૯॥
જ્ઞાનાનાં જ્ઞાનરૂપાય જ્ઞાનિનાં જ્ઞાનધારિણે ।
સદા જ્ઞાનવિહીનાય જ્ઞાનયોગાય તે નમઃ ॥ ૫૦॥
સમાય ચ સ્વરૂપાય સમેભ્યઃ સામ્યદાય તે ।
આનન્દાનન્દકન્દાય સમહીનાય તે નમઃ ॥ ૫૧॥
સહજાય વિહીનાય સહજૈઃ સહજાત્મને ।
સહજાનાં તુ યોગાય નિર્મોહાય નમો નમઃ ॥ ૫૨॥
સ્વાનન્દાય સદા સ્વાનન્દાનાં સ્વાનન્દમૂર્તયે ।
માયાયુક્તાય દેવેશ સર્વાધીશાય તે નમઃ ॥ ૫૩॥
અયોગાય સદા બ્રહ્મનિવૃત્તિં ધારિણે નમઃ ।
અસમ્પ્રજ્ઞાતભાવાય લમ્બોદર નમો નમઃ ॥ ૫૪॥
શાન્તિરૂપાય યોગાય યોગેભ્યો યોગદાય તે ।
ચિત્તભૂમિવિહીનાય નમશ્ચિન્તામણે નમઃ ॥ ૫૫॥
ક્ષમાપરાધકં નાથ વિસ્મૃત્યા ભ્રમસંયુતા ।

અપ્રપૂજ્ય ગણાધીશ ગતા યોદ્ધું પરાત્પરમ્ ॥ ૫૬॥
અધુના મે વરં દેહિ ત્વત્પાદરસદાયકમ્ ।
મહાભક્તિપ્રદં નાથ યેનાઽહં તોષિતા ત્વયા ॥ ૫૭॥
જયં દેહિ ગણાધીશ મહિષસ્ય વધાય વૈ ।
રતાયૈ દેવદેવેશ નમસ્તે પરમેશ્વર ॥ ૫૮॥
એવં તસ્યાઃ સંસ્તુવત્યા ભક્ત્યા રસસમુદ્ભવઃ ।
તેન યુક્તા નનર્તૈવ સાશ્રુનેત્રા પ્રજાપતે ॥ ૫૯॥
લમ્બોદરસ્તાદૃશીં સ નિરીક્ષ્યૈવ જગાદ તામ્ ।
ત્વયા યદ્યાચિતં દેવિ તત્ સર્વં સફલં ભવેત્ ॥ ૬૦॥
(ફલશ્રુતિઃ)
ત્વયા કૃતમિદં સ્તોત્રં ભવેદ્ ભક્તિરસપ્રદમ્ ।
અપરાધસ્ય દેવેશિ સહને કારણં મયિ ॥ ૬૧॥
ભુક્તિં મુક્તિં પ્રદાસ્યામિ સ્તોત્રેણાઽહં હિ સંસ્તુતઃ ।
યં યં ચિન્તયસે કામં તં તં દાસ્યામિ નિશ્ચિતમ્ ॥ ૬૨॥

ઇતિ શક્તિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૧૩ । ૫.૧૩। ૪૫-૬૨॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 13 . 5.13. 45-62..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Shaktikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*